क्रान्तं देवगणैः समग्रबलपौरुषैः । बलवांस्तोलयित्वा तु विषाणाभ्यां महाबलः । ननाद प्राणयोगेन मथ्यमान इवार्णवः । तृतीयं वायुविषयं समाक्रम्य विषाणवान् । ननाद बलवान्नादं समुद्र इव पर्व्वणि” हरि० २२४ अ० ।

**आजगर** न० अजगरं सर्परूपं नहुषमधिकृत्य कृतोग्रन्थः अण् । अगस्त्यशापेनाजगररूपतां प्राप्तस्य नहुषस्य युधिष्ठिरेण संवादरूपे भारतान्तर्गतवनपर्व्वणि अवान्तर पर्व्वभेदे तच्च भा० वनपर्व्वणि १७६ अ० अवधि १८० अध्यायपर्य्यन्ताध्यायषट्कात्मकं तत्कथा तत्रैव दृश्या ।“निवातकवचैर्युद्धं पर्व्व चाजगरं ततः” भा० आ० प० १अ० ।

**आजगव** न० अजगवमेव प्रज्ञाद्यण् । १शिवधनुषि अजगवशब्दार्थे विवृतिः अजगवं तत्साहश्यमस्त्यत्र अण् । तत्तुल्ये दृढे २धनुषि च “आजगवं नाम धनुः शराःस्वङ्गोङ्गवाय ये” भा० व० प० १२७ अ० “तथेत्युक्त्वा पृथुर्वैण्योगृह्णीत्वाजगवं धनुः” भा० द्रो० प० ६८ अ० ।

**आजधेनवि** पुंस्त्री० अजैव धेनुरस्य पृ० पुंवत् तस्यापत्यम् बाह्वादेः आकृतिगणत्वादिञ् । छागीरूपधेनुयुक्तमुनेरपत्ये ।

**आजनन** अव्य० आ+जन–ल्युट् । १विख्यातजनने “तेषामाजननं मुख्यं कर्म्मणः प्रीतिमावहेत्” भा० आ० प० सीमायाम् अव्ययी० । २जन्मपर्य्यन्ते अव्य० ।

**आजन्म(न)** अव्य० जन्मनः पर्य्यन्तम् सीमायाम् अव्ययी० वा अच् । जन्मपर्य्यन्ते “सोऽहमाजन्मशुद्धानाम्” रघुः ।

**आजन्मसुरभिपत्र** पु०आजन्मम् सुरभि पत्रमस्य । मरुवक वृक्षे राजनि० । [मारापत्ये ।

**आजमार्य्य** पुंस्त्री० अजमारस्यापत्यम् कुर्व्वादि०ण्य । अज-

**आजमीढ** पु० अजमीढो देशभेदस्तत्र भवः अण् । (आजमीर) १देशभवे तस्य राजा अण् । तद्देशाधिपे २नृपे बहुषु तस्य लुक् । अजमीढाः । “सधस्तुतिमाजमीढासोऽग्मन्” ऋ० ४, ४४,६, “अजमीढासः तत्सम्बन्धिन” भा० । ३यादव नृपभेदे च “भरतस्य कुरोः पूरोराजमीढस्य चानघ ! यादवानामिमं वंशम्” इत्युपक्रान्तम् भा०आ०प० ७५अ० । “ओमित्येव वशिष्ठोऽपि भारतान् प्रत्यपद्यत । अथाभ्यषिञ्चत् साम्राज्ये सर्व्वक्षत्रस्य पौरवम् । विषाणभूतं सर्व्वस्यां पृथिव्यामिति नः श्रुतम् । भरताध्युषितं पूर्व्वं सोऽध्यतिष्ठत् पुरोत्तमम् । पुनर्बलिभृतश्चैव चक्रे सर्व्वमहीक्षितः । ततः स पृथिवीं प्राप्य पुनरीजे महाबलः । आजमीढो महायज्ञैर्बहुभिर्भूरिदक्षिणैः ९४अ० । अजमीढेषु भवः वुञ् । आजमीढकः बहुत्ववदाजमीढभवे त्रि० ।

**आजयन** न० आजीयतेऽत्र आ+जि–आधारे ल्युट् । युद्धे

**आजरस** अव्य० जरापर्य्यन्तम् अव्ययी० अच् जरसादेशः । जरापर्य्यन्ते । आगता जरा यस्य प्रा० ब० अच् जरसादेशश्च । प्राप्तजराभावे “आजरसाय समनक्त्वर्यमा” ऋ० १०,८५, ४३, ।

**आजवस्तेय** पुंस्त्री० अजवस्तेर्ऋषेरपत्यम् शुभ्रा० ढक् । अजवस्तिनामकर्षेरपत्ये स्त्री० ढञ् । आजवस्तिकोऽप्यत्र स्त्रियां ङीप् ।

**आजवाह** त्रि० अजोवाह्यतेऽत्र वह–णिच् आधारे घञ् अजवाहोदेशभेदः तत्र भवादि अण् । अजवाहदेशभवादौ । सच देशः वदरिकाश्रमादुत्तरस्यां पर्व्वतोपरिस्थः तत्र हि अजैरेव भारो वाह्यते इति तस्य तथात्वम् ।

**आजातशत्रव** पु० अजातशत्रोरपत्यम् अण् । १युधिष्ठिरापत्ये न जातः शत्रुरस्य । अशत्रुकस्य नृपभेदस्यापत्ये २भद्रसेने नृपे च । “एतया वै भद्रसेनमाजातशत्रवमारुणिरभिचचार” शत० ब्रा० अजातशत्रुश्च काशीराजः यथोक्तम्” छा०उ० “सहोवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति” ।

**आजाति** स्त्री आ+जन–क्तिन् । आजनने जन्मनि “ताडयित्वा तृणेनापि संवादान्मतिपूर्व्वकम् । एकविंशतिमाजातीः पापयोनिषु जायते” । “साक्ष्येऽनृतं वदन् पाशैर्बध्यते वारुणैर्भृशम् । विवशः शतमाजातीस्तस्मात्साक्ष्यं वदेदृतम्” इति च मनुः ।

**आजाद** पु०स्त्री अजमत्ति अद–अण् उप०स० तस्यापत्यम् गर्गा०यञ् । छागभक्षकस्य मुनेरपत्ये स्त्रियांङीप् यलोपश्च ।

**आजान** अव्य० जनोजननमेव अण् जानः तत्पर्य्यन्तम् अव्ययी० । सृष्टिकालपर्य्यन्ते मुख्ये ।“अद्भ्यः सम्भृतः पृथिव्यै रसः विश्वकर्म्मणः समवर्त्तताग्रे तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे” यजु० ३१, १७, “पूर्व्वकल्पे पुरुषमेधयाजी आदित्यरूपं प्राप्तः स्तूयते । “अद्भ्यः जलात् पृथिव्याः सकाशात् पृथिव्यपां ग्रहणं भूतपञ्चकोपलक्षकम् भूतपञ्चकात् योरसः सम्भृतः पुष्टः तथा विश्वं कर्म्म यस्य विश्वकर्म्मणः कालस्य रसात्प्रीतेः योरसोऽग्रे प्रथमं समवर्त्तत समभवत् भूतपञ्चकस्य कालस्य च सर्व्वं प्रति कारणत्वात् पुरुषमेधयाजिनो लिङ्गशरीरे पञ्चभूतानि पुष्टानि कालश्च ततः पुष्टेभ्यः कश्चिद्रसविशेषफलरूपोत्तमजन्मप्रद उत्पन्न इत्यर्थः । तस्य रसस्य रूपं विदधत् धारयन् त्वष्टा, आ-